# (३४) लिङ्गनिर्वचनम्

शब्दसामर्थ्यं लिङ्गम् । यच्चाहुः 'सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते' इति । सामर्थ्यं रूढिरेव । तेन समाख्यातोऽस्या भेदः । यौगिकशब्दसमाख्यातो रूढ्यात्मकलिङ्गशब्दस्य भिन्नत्वात् । तेन 'बर्हिर्देवसदनन्दामी' ति मन्त्रस्य कुशलवनाङ्गत्वं न तूलपादिलवनाङ्गत्वम् । तस्य बर्हिर्दामीति लिङ्गात् तल्लवनं प्रकाशयितुं समर्थत्वात् । एवमन्यत्रापि लिङ्गाद्विनियोगो द्रष्टव्यः । तदिदं लिङ्गं वाक्यादिभ्यो बलवत् । अत एव 'स्योनन्ते सदनं कृणोमी'ति मन्त्रस्य पुरोडाशसदनकरणाङ्गत्वम् । सदनं कृणोमीति लिङ्गात् । न तु वाक्यात् ।। ३४ ।।

# (३५) वाक्यनिर्वचनम्

समभिव्याहारो वाक्यम् । समभिव्याहारश्च साध्यत्वादिवाचकद्वितीयाद्यभावेऽपि । वस्तुतः शेषशेषिवाचकपदयोः सहोच्चारणम् । यथा 'यस्य पर्णमयीजुहूर्भवति न स पापं श्लोकं शृणोति' । अत्र पर्णता जुह्वोः समभिव्याहारादेव पर्णताया जुह्वङ्गत्वम् । नचानर्थक्यम्, अन्यथापि जुह्वाः सिद्धत्वादिति वाच्यम् । जुहूशब्देन तत्साध्यापूर्वलक्षणात् ।। तथाच वाक्यार्थः । पर्णतयावत्तहविर्धारण- द्वारा जुह्वपूर्वं भावयेदिति एवं च पर्णतया यदि जुहूः क्रियते तदैव तत्साध्यमपूर्वं भवति नान्यथेति गम्यत इति न पर्णताया वैयर्थ्यम् । अवत्तहविर्धारणद्वारेति चावश्यंवक्तव्यम् । अन्यथा खुवादिष्वपि पर्णतापत्तेः । सेयं पर्णता अनारभ्याधीतापि सर्वप्रकृतिष्वेवान्वेति न विकृतिषु । तत्र चोदकेनापि तत्प्राप्तिसम्भवात्पौनरुक्त्यापत्तेः

।। ३५।।

# (३६) प्रकृतिविकृतिलक्षणम्

यत्र समग्राङ्गोपदेशः सा प्रकृतिः । यथा दर्शपूर्णमासादिः । तत्प्रकरणे सर्वाङ्गपाठात् । यत्र न सर्वाङ्गोपदेशःसा विकृतिः । यथा सौर्य्यादिः । तत्र कतिपयाङ्गानामतिदेशेन प्राप्तत्वात् । अनारभ्यविधिः सामान्यविधिः ।। ३६ ।।

# (३७) वाक्यं प्रकरणादिभ्यो बलवत्

तदिदं वाक्यं प्रकरणादिभ्यो बलवत् । अत
एवेन्द्राग्नी इदं
हविरित्यादेरेकवाक्यत्वाद्दर्शाङ्गत्वं न तु
प्रकरणात् दर्शपूर्ण- मासाङ्गत्वम् ।। ३७ ।।

# (३८) प्रकरणनिरूपणम्

उभयाकाङ्क्षा प्रकरणम् । यथा प्रयाजादिषु ‘समिधो यजती’ त्यादि वाक्ये फलविशेषस्यानिर्देशात् समिद्यागेन भावयेदिति बोधानन्तरं किमित्युपकार्याकाङ्क्षा । दर्शपूर्णमासवाक्येऽपि ‘दर्शपूर्णमासाभ्यां स्वर्गं भावये’दिति बोधानन्तरं कथमित्युपकारकाकाङ्क्षा । इत्थं चोभयाकांक्षया प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम् ।। ३८ ।।

# (३९) प्रकरणभेदः महाप्रकरणम्

तच्च प्रकरणं द्विविधम् । महाप्रकरणमवान्तरप्रकरणं चेति । तत्र मुख्यभावनासम्बन्धिप्रकरणं महाप्रकरणम् । तेन च प्रयाजादीनांदशपूर्णमासाङ्गत्वम् । एतच्च प्रकृतावेव । उभयाकाङ्क्षायाः सम्भवान्नतु विकृतौ । तत्र ‘प्रकृतिवद्विकृतिः कर्तव्ये’ त्यतिदेशेन कथंभावाकाङ्क्षाया उपशमेन । अपूर्वाङ्गानामप्युभयाकाङ्क्षया विनियोगासम्भवात् । तस्मादपूर्वाङ्गानां स्थानादेव विकृत्यर्थत्वमिति ।। ३९ ।।

# (४०) अवान्तरप्रकरणम्

अङ्गभावनासम्बन्धि प्रकरणमवान्तरप्रकरणम् । तेन चाभिक्रमणादीनां प्रयाजद्यङ्गत्वम् । तच्च सन्दंशेनैव ज्ञायते । तदभावे चाविशेषात्सर्वेषां फलभावना कथंभावेन ग्रहणप्रसङ्गेन प्रधानाङ्गत्वापत्तेः ।।४०।।

# (४१) संदंशलक्षणम्

एकाङ्गानुवादेन विधीयमानयोरप्यङ्गयोरन्तराले विहितत्वं सन्दंशः । यथाऽभिक्रमणे । तद्धि “समानयते जुह्वाम् उपभृतस्तेजो वा” इत्यादिना प्रयाजानुवादेन किञ्चिदङ्गं विधाय। विधीयते ‘यस्यैवं विदुषः प्रयाजा इज्यन्ते प्रैभ्यो लोकेभ्यो भ्रातृव्यान्नुदतेऽभिक्रामं जुहोत्यभिजित्यै’ इति। तदनन्तरं ‘यो वै प्रयाजानाम्मिथुनं वेदे’ त्यादिना किञ्चिदङ्गं विधीयते । अतः प्रयाजाङ्गमध्येऽभिहितमभिक्रमणं तदङ्गम् ।

# (४१) संदंशलक्षणम् -२

प्रयाजैरपूर्वं कृत्वा यागोपकारं भावयेदिति ज्ञाते
कथमेभिरपूर्वं कर्तव्यमिति कथंभावाकाङ्क्षायाः सत्त्वात् ।
सा च सन्दंशपठितैरभिक्रमणादिभिः शाम्यति । न
चाङ्गभावनायाः कथंभावाकाङ्- क्षाऽभावः ।
भावनासामान्येन तत्रापि तत्सम्भवात् ।।४१।।

# (४२) प्रकरणविनियोजकत्वम्

तदिदं प्रकरणं क्रियाया एव साक्षाद्विनियोजकम्। द्रव्यगुणयोस्तु तद्वारा । तथाहि यजेत स्वर्गकाम इत्यत्र फलभावनायां कथंभावाकाङ्क्षायां सन्निधिपठिताऽ श्रूयमाणफलकं क्रियाजातमुपकार्याकाङ्क्षयेतिकर्तव्य- तात्वेनान्वेति । क्रियाया एव लोके कथंभावाकाङ्क्षायामन्वयदर्शनात् । न हि कुठारेण छिन्द्यादित्यत्र कथंभावाकाङ्क्षायामुच्चार्य्यमाणोऽपि हस्तोऽन्वेति । किन्तु हस्तेनोद्यम्य निपात्येति उद्यमननिपातने एव । हस्तश्च तद्वारैवान्वेतीति सार्वजनीनमेतत् ।।४२।।

# (४३) प्रकरणं स्थानादिभ्यो बलवत्

इदं च स्थानादिभ्यो बलवत् । अत
एवाक्षैर्दीव्यति राजन्यं जिनातीति देवनादयो
धर्मा अभिषेचनीयसन्निधौ पठिता अपि
स्थानान्न तदङ्गं किन्तु
प्रकरणाद्राजसूयाङ्गमिति ।।४३।।